International Journal of Sanskrit Research 2021; 7(1): 430-434

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 430-434
© 2021 IJSR
www.anantaajournal.com
Received: 19-10-2020
Accepted: 08-12-2020

**अरबिन्दनायकः**

शोधच्छात्रः

राष्ट्रिसंस्कृतविश्वविद्यालयः,

तिरुपतिः, आंध्र प्रदेश, भारत

Corresponding Author:

**अरबिन्दनायकः**

शोधच्छात्रः

राष्ट्रिसंस्कृतविश्वविद्यालयः,

तिरुपतिः, आंध्र प्रदेश, भारत

# जुमरव्याकरणसिद्धान्तकौमुद्योः उपपदविभक्तिविमर्शः

**अरबिन्दनायकः**

**शोधसारः-** विभक्तिः द्विधा कारकोपपदविभक्तिश्च । क्रियान्वयि कारकम्, उपोच्चारितं पदं उपपदम्। क्रियाश्रिता विभक्तिः कारकविभक्तिः, उपपदाश्रिता विभक्तिः उपपदविभक्तिः। जुमरव्याकरणसिद्धान्तकौमुद्योः नैकानि उपपदविभक्तिनिमित्तिकानि सूत्राणि सन्ति तुलनात्मकदृष्ट्या यत्र कौमुद्याम् एकेनैव सूत्रेण विभक्तिविधानं भवति तत्र जुमरव्याकरणे अनेकलघुसूत्राणां समावेशः दृश्यते । कौमुद्यां केषुचित् स्थलेषु वार्त्तिकाणा परिभाषाणां च आश्रयः स्वीकृतः।परन्तु जुमरे न तथा केवलं निजसूत्रेण एव तत् संपादितम्। जुमरे सूत्रस्थप्रत्युपपदानाम् उदाहरणं भवति। कौमुद्यां तु कानिचन उदाहरणानि एव वर्तन्ते। जुमरव्याकरणस्थे सूत्रार्थे द्वितीयातृतीयादिविभक्तिनां नामोल्लेखव्यतिरेके ङस्, औस् इत्यादिभिः सुबादिप्रत्ययैः विभक्तिनिर्देशः दरीदृश्यते।

**पारिभाषिकशब्दाः-** प्रकृतिः, अध्यधिः, अन्तरा, सार्धम्, आरात्, यूना, वषट्, भद्रम्, मद्रम्, असत्वम्, अश्वूत्तरः, प्रतिभूः, गौणम्, अलम्।

**प्रस्तावना:**

"संख्याकारकवोधयित्री विभक्तिः "वाक्येषु प्रयुक्तं पदं द्विविधं भवति सुवन्तं तिङन्तं च।यथा-बालकः स्थाल्याम् ओदनं पचति इत्यत्र बालकः, स्थाल्यां,ओदनमित्यादिनि सुवन्तपदानि वर्तन्ते तथा पचतीति तिङन्तं पदम् ।सुप् अन्तः यस्य तत् सुवन्तम्। सुवन्तपदं तावत् नामशब्देभ्यः सुप्प्रत्यययोजनेन सिद्ध्यति।यथा बालकः इत्यत्र बालकेति प्रकृतिभागः सु इति प्रत्ययभागः। तथैव तिङ् अन्तः यस्य । पचति इत्यत्र पच् इति प्रकृति भागः तिविति प्रत्ययभागः। सुविति एकविंशतिप्रत्ययानां समाहारः। तिङिति अष्टादशप्रत्ययानां समाहारः।

सुप् तिङ् इति उभयविधौ एव प्रत्ययौ विभक्तिशब्देन उच्येते। सुप् प्रत्यया: क्रमश: सप्तसु विभक्तिषु विभक्ता: भवन्ति।प्रत्येकं विभक्ति: त्रिषु वचनेषु विभक्ता भवति। विभक्ति: क्रमेण द्विधा विभक्ता कारकोपपदविभक्तिश्च।

**कारकविभक्ति:**

जुमरव्याकरणानुसारं "करोतीति, कृतवान् इति, करिष्यतीति वेति कारकम्[i]।अर्थात् क्रियासिद्धे: कारणं कारकम्। कौमुद्यनुसारं तु “क्रियान्वयित्वं कारकत्वम्[ii]”।यद्यपि उभयो: लक्षणे विविधता तथापि अर्थदृष्ट्या समानावेव ।यथा- देवदत्त: काष्ठै: स्थाल्यां तण्डुलं पचति । इत्यत्र काष्ठादीनाम् आयोजनं कुर्वन् देवदत्त अपि अविक्लितेः ज्वलनक्रियां कुर्वत् काष्ठमपि, अधिश्रयणक्रियां कुर्वतीं स्थालीमपि स्वावयवविक्लित्तं कुर्वतौदनमपि कारकं भवत्येव।कारकाणि षड्विधानि तानि। कर्त्तुकर्मकरणसम्प्रदाना-पादानाधिकरणानि।

**उपपदविभक्ति:**

उपोच्चारितं पदम् उपपदम्। उपपदनिमित्तिका विभक्ति: उपपदविभक्ति:।यथा- मातरम् अभित: शिशु: क्रीडति इत्यत्र अभित: इति उपपदयोगेन मातरम् इत्यत्र द्वितीयाविभक्ति:।

**जुमरव्याकरणसिद्धान्तकौमुद्यो: उपपदविभक्तिविमर्श:**

उभयत्र उपपदविभक्त्याधारितानि नैकानि सूत्राणि विद्यन्ते।तेषु तुलनात्मतदृष्ट्या केषांचन सूत्राणां अत्र क्रमश: आलोचनं विधास्यते। उभयत्र तु सूत्रोदाहरणयो: भिन्नता वर्तते।

**जुमरव्याकरणे-हादियुक्तात्[iii]:-**

साहचर्यविवक्षया अव्ययै: हादिभि: युक्तादुत्तरे अमौटशस: भवन्ति। हा, धिक्, समया, निकषा,अन्तरा, अन्तरेण, यावत्, उपर्युपरि, अधोऽध:, अध्यधि, नमस्यति, नमस्कृत्य, अभित:, परित:, सर्वत:, उभयत: इत्यादय: वक्षमाणाश्च हादय:। हाप्रभृतिअव्ययशब्दयोगे द्वितीयाविभक्ति: भवति । हा विप्रपुत्र: मृत:,कृपणं धिक्,ग्रामं समया नदी, ग्रामं निकषा पर्वत:,स: त्वां मां च अन्तरा उपविष्ट:,श्रमम् अन्तरेण विद्या न भवति,नदीं यावत् अनुसरति,उपर्युपरि ग्रामम्,अधोऽध: ग्रामम्, अध्यधि: ग्रामम्, नमस्यति गुरुन्, नारायणं नमस्कृत्य, ग्रामम् अभित:, उद्यानं परित:, नगरं सर्वत:,नदीं उभयत: ।

**कौमुद्याम्- अभित:परित:समयानिकषाहाप्रतियोगेपि[iv]:-**

यथा- अभित: परित: वा कृष्णम्, ग्रामं समया, निकषा लङ्काम्, हा कृष्णाभक्तम्, बुभुक्षितं न प्रतिभाति किञ्चित्।

**उभसर्वतसो कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते[v]।।**

यथा - उभयत: कृष्णं गोपा:, सर्वत: कृष्णं, धिक् कृष्णाभक्तम्, उपर्युपरि लोकं हरि:, अध्यधि लोकम्, अधोऽधो लोकम्।

**•अन्तराऽन्तरेण युक्ते[vi]:-** अन्तरा त्वां मां हरि:,अन्तरेण हरिं न सुखम्।

***तुलना:-** जुमरव्याकरणे तु एकेनैएव सूत्रेण अभित:अन्तराद्युपपदानां योगेन द्वितीयाविभक्तिर्भवति। परन्तु कौमुद्यां तु एकेन सूत्रेण तथा वार्तिक द्वयेन अभितान्तराद्युपपदयोगेन द्वितीयाविभक्तिविधानं भवति।उभयत्र उदाहरणानां वैविध्यं दृश्यते।

**जुमरव्याकरणे-क्रियादि गौणात् सहार्थै:[vii] :-** क्रियागुणद्रव्याणां सम्बन्धे गौणात् सहार्थै: शब्दै: युक्तात् उत्तरे टाभ्यां भिसो भवन्ति अर्थात् तृतीयाविभक्ति: भवति। यत्र क्रियादीनां साक्षात् सम्बन्ध: प्रतीयते तत् प्रधानं, यस्य न प्रतीयते तत् गौणम् । यथा -पुत्र: पित्रा सहसाकंसमंसार्धं वा आगत:। साकंसमंसार्धम् एते सहार्था:।

**गम्यमानैश्चसहार्थैः** [viii] :- क्रियादिसम्बन्धे गौणात् गम्यमानैश्च सहार्थैः योगे टाभ्यां भिसो भवन्ति। यथा-पुत्रः पित्रा आगतः।

**कौमुद्याम्-सहयुक्तेऽप्रधाने तृतीया**[ix]:- सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। यथा-पुत्रेण सहागतः पिता । एवं विनाऽपि तद्योगं बृद्धो युना इत्यादिनिर्देशात्।

**तुलनाः-** जुमरव्याकरणे द्वाभ्यां सूत्राभ्यां साकंसार्धंसमंयोगेऽपि।सह तथा तस्य पर्यायवाच्युपपदानां योगे अप्रधाने तथा सहविनापि सहार्थे द्योतिते याविभक्तिविधानं भवति।परन्तु कौमुद्यां तु एकेनैव सूत्रेण।जुमरे द्रव्यगुणक्रियासम्वन्धे गौणात् सहार्थैः तृतीयाविघानम् ।कौमुद्यां तु केवलं सहयुक्तेऽअ- प्रधाने एव तृतीया।जुमरे तु विनापि सहयोगे तृतीयाविधानार्थम् एकं विशेषसूत्रं वर्तते ।परन्तु कौमुद्यां तु" वृद्धोयूना तल्लक्षणश्चेदविशेषः" [x] इतिपाणिनिनिर्देशात् विनापि सहयोगेन चतुर्थीविभक्तिः सिद्धति।

**जुमरव्याकरणे -नमः स्वस्ति स्वाहास्वधा वषट् शक्त्यर्थैः**[xi] :- नमः प्रभृतिभिः शक्त्यर्थैश्च शब्दैः उत्तरे ङेभ्यःभ्यसो भवन्ति अर्थात् चतुर्थीविभक्तिः भवति। यथा- नमः शिवाय, राज्ञे स्वस्ति, अग्नये स्वाहा, पितृभ्यः स्वधा, इन्द्राय वषट्, शक्तो मल्लो मल्लाय । केवलं नमस् शव्दयोगे चतुर्थी नान्यथा। देवं नमस्यतिनमस्कृत्यप्रणम्य वा इत्यादिषु कारकविभक्तित्वात् द्वितीया अथवा हादियुक्तात् द्वितीया।

**कौमुद्याम्- नमः स्वस्तिस्वाहास्वधाऽलंबषड्योगाच्च**[xii]:- एभिर्योगे चतुर्थी स्यात् ।हरये नमः। नमस्करोति देवान्, प्रजाभ्यः स्वस्ति, अग्नये स्वाहा,पितृभ्यः स्वधा।अलम् इति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्यः हरिरलं,प्रभुः,समर्थः,शक्त इत्यादि।

**तुलना** :- जुमरव्याकरणस्थे सूत्रे पर्याप्तवाची शक्तः इत्युपपदस्य प्रयोगः । कौमुद्यां तु अलमिति उपपदप्रयोगः विधियते। जुमरे नमस्कृत्य देवमित्यत्र कारकत्वात् हादियुक्ते वा द्वितीया । कौमुद्यां तु कर्मणि द्वितीया सूत्रेण द्वितीया।

**जुमरव्याकरणे-आशिषि हिताद्यर्थैः** [xiii] :- आशिषि गम्यमानायां हिताद्यर्थैः शब्दैः युक्तात् शब्दादुत्तरे ङेभ्यांभ्यसो वा भवन्ति। यथा- नृपाय नृपस्य वा हितं भूयात्, पुत्राय पुत्रस्य वा पथ्यं भूयात् । सूत्रे आदिशव्देन आयुष्यार्थः, भद्रार्थः, स्वस्तिवर्जं कुशलार्थः, सुखार्थः, प्रयोजनार्थश्च गृह्यन्ते। नृपाय नृपस्य वा आयुष्यं जीवितं भद्रं कुशलं सुखं प्रयोजनं अर्थः वा भूयात्।

**कौमुद्याम् -चतुर्थीचाशिष्यायुष्यभद्रमद्रकुशलसुखार्थहितैः** [xiv] :- एतदर्थे योगे चतुर्थी वा स्यात् पक्षे षष्ठी। आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा भूयात्।

**तुलना** :- जुमरव्याकरणस्थे सूत्रे आशिरर्थे युक्तहिताद्युपपदानां योगे चतुर्थिषष्ठ्योः विघानम् । कौमुद्यां तु आशीरर्थवाचकानाम् आयुष्यभद्रमद्रादिनामुल्लेखः वर्तते। जुमरे आदिशब्देन प्रयोजनार्थस्यापि ग्रहणम्।

**जुमरव्याकरणे-स्तोकादेधर्मवाचिनः करणात्** [xv] :- धर्मवाचिनः स्तोकादेः करणात् उत्तरे ङसिभ्यः भ्यसो वा भवन्ति।यथा - स्तोकात् स्तोकेन वा मुक्तः,अल्पेन अल्पात् वा मुक्तः, कुच्छ्रेण कुच्छ्रात् वा मुक्तः, कतिपयेन कतिपयात् वा मुक्तः। अधर्मवाचिनस्तु स्तोकेन पयसां तृप्तः । अकरणात्तु स्तोकं चलति अल्पं पचति।

**कौमुद्याम्-करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य**[xvi]: – एभ्य अद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः। स्तोकेन स्तोकात् वा मुक्तः।

**तुलना** :- जुमरानुसारं तु धर्मवाचिनः स्तोकादेः पञ्चमितृतीये भवतः। कौमुद्यनुसारम् अद्रव्यवाचिभ्यः स्तोकादिभ्यः पञ्चमितृतीये भवतः।

**जुमरव्याकरणे-आरादाद्यैः** [xvii] :- आरादाद्यैः शब्दैः युक्तादुत्तरे ङसिभ्यांभ्यसो भवन्ति। अर्थात् आरात् प्रभृतिशब्दयोगे पञ्चमीविभक्तिः भवति। ग्रामात् आरात् वसति, ग्रामात् दक्षिणा वसति । एवम् उत्तरा ग्रामात्,दक्षिणाहि ग्रामात्, उत्तराहि ग्रामात्। आरात्, आच्, आहि प्रत्ययान्ताः शब्दाः वक्ष्माणाश्च आरादाद्याः।

**अन्यार्थः**[xviii] :- अन्यार्थशब्द आरादादिर्भवति। यथा- चैत्रादन्यः, मैत्रात् भिन्नः, घटादितरः। अन्यः, भिन्नः, विलक्षणः, इतरः, व्यतिरिक्तः, इत्यादयः अन्यार्थः।

**दिग्देशकालार्थः पूर्वादिः** [xix] :- दिग्देशकालार्थः पूर्वादिः आरादादिर्भवति ।यथा- ईयअस्याः उत्तरादिक्, ग्रामात् पूर्वः पर्वतः अस्ति, मघात् पूर्वः पौषः, माघात् उत्तरः फाल्गुनः,शीतात् परःवसन्तः, उद्यानात् उत्तरेण गृहमस्ति इत्यादि।

**अञ्चुत्तरपदः**[xx]:- अनचु उत्तरपदं यस्य स आरादादि भवति। यथा- ग्रामात् प्राक्, उद्यानात् प्रत्यक् इत्यादि।

**ऋतेयुक्ताद्वितीया च**[xxi]:- ऋते युक्तात् शब्दात् उत्तरे ङसिभ्यांभ्यसो भवन्ति । अर्थात् ऋतेति अव्यययोगे पञ्चमिद्वितीयाविभक्ती भवतः। यथा-श्रमात् ऋते श्रमं ऋते वा विद्या न भवति।

**कौमुद्याम्-अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते** [xxii] : – एतैर्योगे पञ्चमी स्यात्। अन्यो भिन्न इतरो वा कृष्णात्, आराद्वनात्, ऋते कृष्णात्,पूर्वो ग्रामात्, चैत्रात् पूर्वो फाल्गुनः, प्राक् प्रत्यग्वा ग्रामात्, दक्षिणा ग्रामात्,दक्षिणाहि ग्रामात्।

**तुलना** :- जुमरव्याकरणे पञ्चभिः सूत्रै अन्यारात् इत्यादिभिः शब्दैः योगे तथा अञ्चु, आहि आदिभिः प्रत्ययान्तशब्दैः योगे पञ्चमिद्वितीये विभक्ती भवतः। परन्तु कौमुद्याम् एकेनैवसूत्रेण पञ्चमिद्वितीयेभवतः।

**जुमरव्याकरणे-र्याद्यैः** [xxiii] :- रि आदिभिः तद्धितान्तैः शब्दैः युक्तादुत्तरे ङसोसामो भवन्ति। आद्य-शब्देन रिष्टाति, अस्, स्तात्, आत्, अतस्, प्रत्ययाः गृह्यन्ते। रि प्रभृतितद्धितप्रत्ययान्तशब्दयोगे षष्ठि- विभक्तिः भवति ।यथा-वृक्षस्य उपरि वसति, वृक्षस्य उपरिष्टात्, ग्रामस्य पुरः, वृक्षस्य अधः, ग्रामस्य पुरस्तात्, उत्तरात् ग्रामस्य उत्तरातो ग्रामस्य ।

**कौमुद्याम्-षष्ठ्यतसर्थप्रत्ययेन**[xxiv]:- एतद्योगे षष्ठी स्यात्। दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात् वा।

**तुलना** :- जुमरव्याकरणे तु रि आदिभिः तद्धितान्तैः षष्ठी भवति। यद्यपि सूत्रेण समानमेव कार्यं विधियते तथापि अर्थगतदृष्ट्या कौमुद्याः सूत्रे अतसर्थशब्देन पञ्चप्रत्ययानां स्पष्टीकरणं वर्तते।

**जुमरव्याकरणे-स्वाम्याद्यैः** [xxv] :- स्वाम्याद्यैः शब्दैः युक्तात् शब्दादुत्तरे ङि ओस् सुपो भवन्ति षष्ठी च। स्वामी, ईश्वर, अधिपतिः, दायादः, साक्षि, प्रतिभूः, प्रसूतः एते स्वाम्यादयः। यथा- गोषु गवां स्वामी ईश्वरः अधिपतिः वा। कुलेकुलस्य वा दायादः, विवादेविवादस्य वा साक्षि, व्यवहारेव्यवहारस्य वा प्रतिभूः छागेछागस्य वा प्रसूतः ।

**कौमुद्याम्-स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च** [xxvi] **:-** एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः।गवां गोषु वा स्वामी।गवां गोषु वा प्रसूतः।

**तुलना :-** जुमरव्याकरणस्थे सूत्रे आदिशब्देन ईश्वराधिपत्यादिशब्देनां ग्रहणं भवति।परन्तु कौमुद्यां स्वाम्यादिसप्तानां शब्दानां स्पष्टीकरणं विद्यते।

**उपसंहारः-**

वस्तुतः जुमरव्याकरणसिद्धान्तकौमुद्योः न विशेषः विभेदः । उभयोः सूत्रशैल्यां सूत्रार्थे उदाहरणे च किञ्चिन्मात्रं भेदः किञ्चिन्मात्रमभेदः दृश्यते ।यद्यपि वहुनि उपपदविभक्त्याश्रितानि सूत्राणि वर्तन्ते तथापि तुलनात्मकदृष्ट्या कानिचनसूत्राणि प्रदर्शितानि।

**सहायकग्रन्थसूची :-**


1. जुमरसरणीव्याकरणम्, संपादकः, पण्डितः श्री चन्द्रशेखरकाव्यतीर्थः, गोपबन्धुसाहित्यमन्दिरम्, कटकम्, १९२६
2. वैयाकरणसिद्धान्तकौमुदी, संपादकः -डा. गोपालदत्तपाण्डेयः- चौखम्बासुरभारतीप्रकाशनम्, २०१३
3. वैयाकरणसिद्धान्तकौमुदी, संपादकः - डा. गोविन्दाचार्यः - चौखम्बासुरभारतीप्रकाशनम्, २०१३
4. Linguistic analysic of paninian grammer, editor- Dr. Sashibhusan Mishra, The benaras mercantile. co, Kolkata, 2012.
5. संक्षिप्तसारव्याकरणम्-संपादकः-ड.के.एस्.साइनि, प्रकाशनं-भारतीयविद्याप्रकाशनं, नवदेहली, 2000


---

[i] सं.व्या, मुखबन्धः

[ii] प्रौ.म,पृ-३०

[iii] जु.स.व्या.४२

[iv] सि.कौ.वा. १४४२-१४४३

[v] सि.कौ.वा. १४४४

[vi] सि.कौ. ५४५

[vii] जु.स.व्या.५४

[viii] जु.स.व्या.५५

[ix] सि.कौ.५६४

[x] सि.कौ.६४

[xi] जु.स.व्या.६०

[xii] सि.कौ.५८३

[xiii] जु.स.व्या.६२

[xiv] सि.कौ.६६१

[xv] जु.स.व्या.७४

[xvi] सि.कौ.६०४

[xvii] जु.स.व्या.७५

[xviii] जु.स.व्या.७३

[xix] जु.स.व्या.७७

[xx] जु..स.व्या.७८

[xxi] जु.स.व्या.५९५

[xxii] सि.कौ.५९५

[xxiii] जु.स.व्या.९०

[xxiv] सि.कौ.६०१

[xxv] जु.सं.व्या.११७

[xxvi] सि.कौ.६३६